# 2020

## SANSKRIT — GENERAL

### Paper : SEC-A-2

### (Basic Elements of Āyurveda)

### Full Marks : 80

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु ***पञ्च*** प्रश्नाः समाधेयाः (संस्कृतभाषया देवनागरीलिप्या च)। 2×5

(a) भावप्रकाशः केन विरचितः? तत्र कति विभागाः सन्ति?

(b) आयुर्वेदस्य कति विभागाः सन्ति? तेषां मध्ये कयोश्चिद् द्वयोः नाम लिख्यताम्।

(c) चक्रपाणिदत्तेन विरचितयोः द्वयोः आयुर्वेदीयग्रन्थयोः नाम लिख्यताम्।

(d) चरकसंहितायाः एकस्याः टीकायाः तत्कर्त्तुश्च नाम लिख्यताम्।

(e) आयुर्वेदशास्त्रस्य बृहत्त्रयी का?

(f) आयुर्वेदे प्रसिद्धयोः कयोश्चिद् द्वयोः संहिताग्रन्थयोः नाम लिख्यताम्।

(g) नागार्जुनरचितस्य ग्रन्थद्वयस्य नाम लिख्यताम्।

(h) सुश्रुतसंहितायां कति अध्यायाः सन्ति? तेषु द्वयोर्नाम लिख्यताम्।

**2.** अधस्तनेषु कयोश्चिद् ***द्वयोः*** परिचयो लेख्यः। 5×2

(a) शार्ङ्गधरसंहिता

(b) माधवनिदानम्

(c) जीवकः

(d) वाग्भटः

**3.** अधोलिखितेषु केषाञ्चित् ***त्रयाणां*** वङ्गभाषया आङ्गलभाषया वा अनुवादः क्रियताम्। 5×3

(a) ब्रह्मणा हि यथाप्रोक्तमायुर्वेदं प्रजापतिः।
जग्राह निखिलेनादावश्विनौ तु पुनस्ततः॥

(b) ऋषयश्च भरद्वाजाज्जगृहुस्तं प्रजाहितम्।
दीर्घमायुश्चिकीर्षन्तो वेदं वर्धनमायुषः॥

(c) अग्निवेशश्च भेडश्च जतूकर्णः पराशरः।
हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः।।

(d) व्याधयो हि समुत्पन्नाः सर्वप्राणिभयङ्कराः
तद् ब्रूहि मे शमोपायं यथावदमरप्रभो।।

(e) संयोगे च वियोगे च कारणं द्रव्यमाश्रितम्।
कर्तव्यस्य क्रिया कर्म कर्म नान्यदपेक्षते।।

**4.** संस्कृतभाषया देवनागरलिप्या च अधोलिखितयोः ***एकस्य*** श्लोकस्य व्याख्या कार्या। 7×1

(a) हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते।।

(b) तस्यायुषः पुण्यतमो वेदो वेदविदां मतः।
वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितम्।।

**5.** ***द्वयोः*** टीका लेख्या (संस्कृतेन देवनागरीलिप्या च)। 4×2

(a) आयुर्वेदे द्रव्यभेदाः

(b) आयुर्वेदे कर्मभेदाः

(c) आयुर्वेदसम्मताः गुणाः

(d) षट्पदार्थाः

(e) रसः।

**6.** प्रश्नोद्धृतान् मन्त्रान् विहाय तैत्तिरीयोपनिषदः **कमप्येकं** स्वाभिमतं मन्त्रं लिखत (देवनागरलिप्या च)। 10

**7.** अधोलिखितेषु कयोश्चिद् ***द्वयोः*** मन्त्रयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन।।

(b) भीषास्माद्वातः पवते भीषोदेति सूर्यः।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः।।

(c) शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः।।

**8.** तैत्तिरीयोपनिषदः शीक्षावल्लीभागे समालोचितानां विषयाणां स्वभाषया संक्षेपेण विवरणं लिख्यताम् (संस्कृतेन देवनागरलिप्या च)। 10

***अथवा***

संस्कृतभाषया देवनागरलिप्या च अधोलिखितयोः **अन्यतरस्य** व्याख्या सप्रसङ्गं क्रियताम्ः। 10

(a) मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।

(b) रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति।

---